শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীকূরনাথশ্রীৰতসচিহ্নমিশ্র ৰিরচিতম্

# ॥শ্রী যতিরাজ প্রার্থনাপঞ্চকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী যতিরাজ প্রার্থনাপঞ্চকম্॥

শ্রীৱতসচিহ্নমিশ্রেভ্যো নম উক্তিমধীমহে।
যদুক্তযস্ত্রযীকণ্ঠে যান্তি মঙ্গল সূত্রতাম্॥

যতীশ্বর! শৃণু শ্রীমন! কৃপযা পরযা তৱ।
মম ৱিজ্ঞাপনমিদং ৱিলোক্য ৱরদং গুরুম্॥ ১ ॥

অনাদিপাপরচিতাম্ অন্তঃকরণনিষ্ঠিতাম্।
যতীন্দ্রৱিষযে সান্দ্রাং ৱিনির্ৱাসয ৱাসনাম্॥ ২ ॥

অপি প্রার্থযমানানাং পুত্রক্ষেত্রাদিসম্পদাম্।
কুরু বৈরাগ্যমেৱাত্র হিতকারিন্ যতীন্দ্র! নঃ॥ ৩ ॥

যথাপরাধা ন স্যুর্মে ভক্তেষু ভগৱত্যপি।
তথা লক্ষ্মণযোগীন্দ্র! যাৱদ্দেহং প্রৱর্তয॥ ৪ ॥

আমোক্ষং লক্ষ্মণার্য! ত্বতপ্রবন্ধপরিশীলনৈঃ।
কালক্ষেপোস্তু নসসদ্ভিঃ সহৱাসমুপেযুষাম্॥ ৫ ॥

পরাঙ্কুশমুনীন্দ্রাদিপরমাচার্যসূক্তযঃ।
স্বদন্তাং মম জিহ্বাযৈ স্বত এৱ যতীশ্বর!॥ ৬ ॥

ইত্যেতত্ সাদরং ৱিদ্বান্ প্রার্থনাপঞ্চকং পঠন্।
প্রাপ্নুযাত্ পরমাং ভক্তিং যতিরাজপদাব্জযোঃ॥ ৭ ॥

কাষাযশোভিকমনীযশিখানিৱীতং
দণ্ডত্রযোজ্বলকরং ৱিমলোপৱীতম্।
উদ্যদ্দিনেশনিভমুল্লসদূর্ধ্বপুণ্ড্রং
রূপং তৱাস্তু যতিরাজ! দৃশো মমাগ্রে॥ ৮ ॥

ন চেদ্রামানুজেত্যেষা চতুরা চতুরক্ষরী।
কামৱস্থাং প্রপদ্যন্তে জন্তৱো হন্ত মাদৃশাঃ॥ ৯ ॥

www.prapatti.com

পুণ্যাম্ভোজৱিকাসায পাপধ্ৱান্তক্ষযায চ।
শ্ৰীমানাৱিরভূদ্ভূমৌ রামানুজদিৱাকরঃ॥ ১০ ॥

তৃণীকৃতৱিরিঞ্চ্যাদিনিরঙ্কুশৱিভূতযঃ।
রামানুজপদাম্ভোজসমাশ্ৰযণশালিনঃ॥ ১১ ॥

॥ ইতি শ্ৰী যতিরাজ প্ৰাৰ্থনাপঞ্চকং সমাপ্তম্ ॥

www.prapatti.com